दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणशुक्लषष्ठी
भाद्रपद 02 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-8 ■ वर्ष-5 ■ अङ्क-299 | 1 | अगस्त 18, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com




1 भूतपूर्व-उपराष्ट्रपति-एम.वेङ्कैयानायडू-महोदयस्य जीवनचरिताधारितस्य हिन्दीग्रन्थस्य विमोचनम्

3 महाविद्यालयेषु, विश्वविद्यालयेषु च 'ए.आई.' ड्रोन-प्रौद्योगिक्या सह भविष्यति क्रीडा- विज्ञानम्'-विषयस्य पाठनम्; उच्च- शिक्षा-परिषदः उपवेशने निर्णयः

8 रैयाम-सकरी-शर्करा-यन्त्रागाराणां पुनरुद्धारेण मिथिलायां वर्धिष्यन्ते वृत्ति-अवसराः, कृषकाणाम् आयः भविष्यति द्विगुणितः: मन्त्री


## मोदिप्रशासनेन स्वातन्त्र्यदिवसात् पूर्वम् आई.एस.आई. इत्यनेन समर्थितं शाहजादभट्टी-आतङ्कि-जालं ध्वस्तीकृतम् - केन्द्रीयगृहमन्त्री अमितशाहः



केन्द्रीय-गृहमन्त्री अमितशाहः स्पष्टीकृतवान् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः कुशल नेतृत्वे सर्वकारेण स्वतन्त्रता-दिवसात् पूर्वम् आईएसआई-पोषितस्य शहज़ाद-भट्टी-आतङ्क-समूहस्य समूलनाशो विहितः। सः असूचयत् यत् सुरक्षा-बलैः द्विशताधिकाः सदस्याः निगृहीताः अथ तेषां राष्ट्र-विरोधि-विध्वंसकाक्रमणानां योजनाश्चापि विफलीकृताः। एकस्मिन् सामाजिक सञ्चालीय-सन्देशे गृहमन्त्रिणा प्रतिपादितं यत् सुरक्षा-बलैः चतुर्दशसु राज्येषु विविधेषु स्थानेषु समन्वित-अभियानानि सञ्चाल्य अयं आतङ्कवादः ध्वस्तीकृतः । एतत् तावत् आतङ्कवादमभिव्याप्य भारतस्य असहिष्णुतायाः उत्कृष्टम् उदाहरणं वर्तते। सः प्रतिपादितवान् यत् तेषां पक्षतः हस्त-विस्फोटकानि, आईडी-विस्फोटक यन्त्राणि, भुशुण्डिकाः, अथ च अन्वीक्षण-यन्त्राणि च स्वायत्तीकृतानि । श्रीशाहः संयोजितवान् यत् एतत् आतङ्क-जालम् अनेकेषु राष्ट्र-विरोधि-आतङ्की-कृत्येषु संलिप्तम् आसीत्।

## शिक्षामन्त्री प्रह्लादजोशी निर्धारितपरीक्षा-कार्यविधेः कठोरतया अनुपालनं सुनिश्चेतुम् अधिकारिभिः सह उपवेशनं कृत्वा निर्देशान् प्रदत्तवान्

शिक्षामन्त्री प्रल्हाद-जोशी नवदेहल्याम् उच्चशिक्षा विभागस्य सचिवेन, राष्ट्रिय-परीक्षा-संस्थायाः महानिदेशकेन अथ अन्यैः वरिष्ठाधिकारिभिः सह उपवेशनम् अकरोत्। उपवेशने मन्त्रिणा निर्दिष्टं यत् निर्धारितानां परीक्षा-मानदण्डानां दृढतया अनुपालनं भवेत्। सः गोपनीय-कार्य-संरचना, पृथक्कृत-प्रकोष्ठाः अन्तर्जाल-सम्पर्क-रहितानि उपकरणानि, अपि च विद्युदुपकरण-निक्षेप-मादण्डः इत्यादीनां सम्यक्-क्रियान्वयनाय आदिशत्। संस्था सर्वविधानां परीक्षा-प्रक्रियाणां गभीर-लेखापरीक्षां कर्तुं एवं च परिष्कार-पदक्षेपाणां प्रतिवेदनं समर्पयितुं निर्दिष्टा ।



उपवेशनावसरे अधिकारिभिः मन्त्रिणः समक्षं सद्यो जातानां घटनानां पृष्ठभूमौ सम्पूर्ण-व्यवस्थायाः परिष्कार-सन्दर्भे राष्ट्रिय परीक्षा-संस्थया गृहीतानां परिष्कारात्मक-पदक्षेपाणां विवरणं प्रकटीकृतम्।

## विकसित-भारतस्य दिशि सार्वजनिकक्षेत्रस्य बित्तकोषेषु तत्सम्बद्धपरिष्काराणाम् अथ भाविस्वरूपस्य च समीक्षायै प्रशासनम् उच्चस्तरीयसमितेः निर्माणं करिष्यति- सीतारमनः



विकसित-भारतस्य लक्ष्य प्राप्तये सर्वकारेण शीघ्रमेव वित्तकोष-क्षेत्रे काचित् उच्चाधिकार-समितिः निर्मास्यते। केन्द्रीय वित्तमन्त्री निर्मला सीतारामन इत्येषा नवदेहल्यां द्विदिवसीयस्य सार्वजनिक-क्षेत्रीय-बैंक सम्मेलनस्य उद्घाटनं कृत्वा एतत् घोषितवती। सा प्रतिपादितवती यत् एषा समितिः विविध-विषयान् विचार्य वित्तकोषीय-परिष्काराणां भावि-दिशं निर्धारयिष्यति। वित्तमन्त्रिणा आशा प्रकटीकृता यत् अस्मिन् सम्मेलने सञ्जातानां परिचर्चानां निष्कर्षाः वित्तकोषाणां भावि-भूमिकायाः विषये संस्तुति-निर्माणे च समित्यै महत्वपूर्णान् दृढ-परामर्शान् प्रदास्यन्ति। सा न्यगादीत् यत् भारतीय-वित्तकोषाः सम्प्रति सुदृढ-स्थितौ सन्ति, यत्र अनुत्पादक-परिसम्पत्तयः स्वकीय-न्यूनतम स्तरे वर्तन्ते, या स्थितिः अग्रे परिष्काराणां कृते दृढाधारं प्रदास्यति।

## भारतस्य एम्. आर्. अर्जुन-हरिहरन-अम्साकरुणन इत्येतयोः पुरुषयुगलं द्वितीयचरणे प्रविष्टम्

बीडब्ल्यूएफ्-वैड्मिण्टन्-विश्वस्पर्धायां भारतीययुगलं एम्. आर्. अर्जुनः तथा हरिहरन् अम्साकरुणन च नवदेहल्यां पुरुषयुगलवर्गस्य द्वितीयचरणे प्रविष्टवन्तौ




## अद्यतनीयं सुभाषितम्

**आदानमप्रियकरं, दानं च प्रियकारकम्।**
**अभीप्सितानामर्थानां, काले युक्तं प्रशस्यते।।**

भावार्थः- किसी से कुछ मांगना कभी भी अच्छा नहीं लगता है परन्तु दान देना सबको अच्छा लगता है। इसीलिए धन संपत्ति की कामना करने वालों द्वारा उसे सही समय पर (अच्छे साधनों से) ही अर्जित करने पर ही उनकी प्रशंसा होती है।


हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा




## कुमाऊँ क्षेत्रस्य सीमान्त-ग्रामेभ्यः आगतेन छात्रसमूहेन सह मेलनम् अकरोत् राष्ट्रपतिः

राष्ट्रपतिपदासीना द्रौपदी मुर्मुः उत्तराखण्डे कुमाऊँ क्षेत्रस्य सीमान्त-ग्रामेभ्यः आगतेन छात्रसमूहेन सह मेलनम् अकरोत्। एषः छात्र-समूहः राष्ट्रिय एकता-यात्रायाः अङ्गतया राष्ट्रपति-भवने समागतः।

## प्रधानमन्त्री पश्चिमबङ्गाले सञ्जाते भीषणाग्निकाण्डे जातां प्राणहानिमालक्ष्य दुःखं प्रकटितवान्

प्रधानमन्त्री नरेन्द्रमोदी पश्चिमबङ्गालस्य बीरभूम-स्थले सञ्जाते भीषणाग्निकाण्डे जातां प्राणहानिमालक्ष्य अनुशोचितवान्। एकस्मिन् सामाजिक सञ्चार-पटलीय-सन्देशे सः शोकसन्तप्त-कुटुम्बेभ्यः सान्त्वनां प्रायच्छत् । प्रधानमन्त्रिणा आहतानां शीघ्र स्वास्थ्य-लाभाय अपि प्रार्थना कृता। सः आश्वासितवान् यत् स्थानिक प्रशासनं दुर्घटना-ग्रस्तेभ्यः साहाय्यं प्रदातुं सर्वविधप्रकारेण प्रयतते। प्रधानमन्त्रिणा प्रधानमन्त्रि राष्ट्रिय-सहायता-कोषात् मृतकानां परिजनेभ्यः लक्षद्वय-रूप्यकाणां, अथ च व्रणितेभ्यः पञ्चाशत्-सहस्र-रूप्यकाणां अनुग्रह-धनराशेः प्रघोषणम् कृतम्।

# भूतपूर्व-उपराष्ट्रपति-एम.वेङ्कैयानायडू-महोदयस्य जीवनचरिताधारितस्य हिन्दीग्रन्थस्य विमोचनम्




रक्षामन्त्रिणा राजनाथसिंहेन, भाजपा-राष्ट्रियाध्यक्षेण नितिननवीनेन, देहली-मुख्यमन्त्रिकया रेखागुप्तया च नवदेहल्यां भूतपूर्व-उपराष्ट्रपति-एम.वेङ्कैयानायडू-महोदयस्य जीवनचरिताधारितस्य हिन्दीभाषायां लिखितस्य ग्रन्थस्य विमोचनं कृतम्। अस्य ग्रन्थस्य लेखकः भूतपूर्व-राज्यसभामन्त्री (सांसदः) वाई. लक्ष्मीप्रसादः वर्तते। राजनाथसिंहः अकथयत् यत् इयं जीवनी केवलं घटनानां सङ्ग्रहः नास्ति, अपितु वेङ्कैयानायडू-महोदयस्य व्यक्तित्वं, सङ्घर्षम्, संवेदनशीलतां जनसेवायै समर्पणभावं च प्रकटीकर्तुं सार्थकः प्रयासः अस्ति। सः आशां प्राकटयत् यत् अयं ग्रन्थः पाठकान् प्रेरयिष्यति। नितिननवीनः अवदत् यत् अयं ग्रन्थः भूतपूर्व-उपराष्ट्रपतेः तथा भाजपा-भूतपूर्व-राष्ट्रियाध्यक्षस्य वेङ्कैयानायडू-महोदयस्य सार्वजनिकजीवनस्य राष्ट्रसेवाप्रद-यात्रायाः सहैव तस्य विचारैः, सङ्घर्षैः योगदानैश्च पाठकान् परिचाययति। देहली-मुख्यमन्त्रिका रेखा गुप्ता न्यवेदयत् यत् एषा कृतिः वेङ्कैयानायडू-महोदयस्य दीर्घ-सार्वजनिक-यात्रायाः, राष्ट्रसेवाभावस्य, लोकतान्त्रिकमूल्यानां तथा जनकल्याणाय तस्य दृढप्रतिबद्धतायाः साक्षाद्दर्शनं कारयति।

## उपराष्ट्रपतिः तमिलनाडु-राज्यस्य तिरुवारूर्-नगरे तमिलनाडु-केन्द्रीय-विश्वविद्यालयस्य एकादशमं दीक्षान्त-समारोहं सम्बोधितवान्



उपराष्ट्रपतिः सी.पी. राधाकृष्णन् इत्यसौ प्रतिपादितवान् यत् कृत्रिम बुद्धिमत्तायाः अथ च तीव्र-गत्या विकसमानायाः प्रौद्योगिक्याः युगे उपाधि-प्राप्तिः शिक्षायाः अन्तः नास्ति, अपि तु निरन्तर-अनुकूल-जीवनस्य नूतनारम्भः वर्तते। सः तमिलनाडु-राज्यस्य तिरुवारूर्-नगरे तमिलनाडु-केन्द्रीय-विश्वविद्यालयस्य एकादशमे दीक्षान्त समारोहे सम्बोधनं कुर्वन् आसीत्। उपराष्ट्रपतिना चतुर्दशाधिक-द्विसहस्रतमात् वर्षात् आरभ्य भारतस्य शैक्षणिक-आधारभूत-संरचनायाः अभूतपूर्वः विस्तारः रेखाङ्कितः। सः समग्रे देशे षोडश आई-आई-टी-संस्थानानां अष्ट-केन्द्रीय-विश्वविद्यालयानां, अष्ट-आई-आई-एम-संस्थानानां, अथ च द्वादश-नूतन-एम्स चिकित्सालयानां स्थापनायाः विषये उल्लिखितवान्। सः समाजे निर्धनतां अज्ञानतां च दूरीकर्तुं शिक्षां परमसाधनत्वेन वर्णितवान्।

## भारतेन स्वीये अध्यक्षतावसरे ब्रिक्स-सहयोगे जनकेन्द्रिता मानवताप्रधाना च दृष्टिः पुनः प्रकटिता




भारतं प्रधानमन्त्रिणः नरेन्द्रमोदिनः परिकल्पनया निर्देशितां जनकेन्द्रितां मानवताप्रधानां च दृष्टिं प्रति स्वप्रतिबद्धतां पुनः प्राकटयत्। विदेशमन्त्रालयस्य आर्थिकसम्बन्धसचिवः सुधाकर-दलेला इत्येषः उक्तवान् यत् भारतेन स्वीये ब्रिक्स इत्यस्य अध्यक्षतावधौ सामूहिकप्रयत्नानां केन्द्रे जनाः स्थापिताः। नवदेहल्याम् आयोजितम् अस्य वर्षस्य ब्रिक्स नागरिकमञ्चं सम्बोधयन् असौ एतत् उक्तवान्। असौ अवदत् यत् अध्यक्षतावसरे विभिन्नेषु नगरेषु पञ्चाशदधिक-त्रिशताधिकानि उपवेशनानि सम्पन्नानि, यैः विभिन्नेषु क्षेत्रेषु महत्त्वपूर्णाः परिणामाः प्राप्ताः। असौ अग्रे उक्तवान् यत् एतैः उपवेशनैः ब्रिक्स् इत्यस्य त्रयाणाम् आधारस्तम्भानाम् - राजनैतिक-सुरक्षासहयोगः वित्तीयसहयोगः प्रतिजनमध्ये पारस्परिक सहभागिता चेत्येतेषां मध्ये परस्परं सहयोगः इतोपि सुदृढः अभवत्। अस्य वर्षस्य ब्रिक्स् नागरिकमञ्चम् इत्यस्य विषये श्री दलेला उक्तवान् यत् अस्माद् आयोजनात् प्राप्ताः परामर्शाः अस्मिन् वर्षे आयोज्यमानाय ब्रिक्स्-नेतृणां शिखरसम्मेलनाय उपयोगिनः भविष्यन्ति।

## भारतीयजनतापक्षस्य राष्ट्रियाध्यक्षेण नितिननवीनेन नूतनानां राष्ट्रियपदाधिकारिणां घोषणा कृता



भारतीयजनतापक्षस्य राष्ट्रियाध्यक्षेण नितिननवीनेन पक्षस्य नूतनानां राष्ट्रियपदाधिकारिणां नामावली प्रख्यापिता। श्रीनवीनेन वसुन्धरा राजे सिन्धिया, तीरथसिंहरावतः, राममाधवः, बैजयन्त जय पाण्डा, सरदार मनप्रीतसिंहबादलः, रेखा वर्मा च इत्यादिसहिताः त्रयोदश (१३) राष्ट्रियोपाध्यक्षाः नियुक्ताः। केन्द्रीयमन्त्री भाजपानेता च पीयूषगोयलः पक्षस्य राष्ट्रियकोषाध्यक्षपदे नियुक्तः। श्री बी. एल. सन्तोषः पुनः सङ्घटनात्मक-राष्ट्रिय-महासचिवपदं समलङ्करोति। श्रीनवीनेन विनोदतावडे, सुनीलवंशल्, स्मृति-ईरानी, बिप्लबकुमारदेवः च इत्यादिसहिताः अष्ट (८) नेतारः राष्ट्रियमहासचिवत्वेन नियुक्ताः। पक्षेण स्वस्य विविधानां मोर्चा-सङ्घटनानां नूतनाध्यक्षाणामपि घोषणा कृता, येषु डॉ. हेमाङ्गजोशी युवामोर्चाध्यक्षः, रूपकुमारीचौधरी महिलामोर्चाध्यक्षा, बंसीलालगुर्जरश्च किसानमोर्चाध्यक्षः वर्तते।

### भाजपा-राष्ट्रियाध्यक्षेण नितिन-नवीनेन नवनियुक्त-पदाधिकारिभ्यः शुभाशयाः समर्पिताः

भारतीयजनतापार्टीदलस्य राष्ट्रियाध्यक्षेण नितिन-नवीनेन दलस्य राष्ट्रियकार्यकारिण्याः सर्वेभ्यः नवनियुक्तपदाधिकारिभ्यः शुभाशयाः प्रकटीकृताः। सामाजिक-माध्यमस्य एकां वार्तां प्रसारयन् सः अवदत् यत् एतेषु नवनियुक्तेषु पदाधिकारिषु अनुभवस्य ऊर्जायाश्च अनुपमः सङ्गमः अस्ति।

## केन्द्रीयमन्त्रिणा डॉ. जितेन्द्रसिंहेन पञ्चदश (१५) चयनितविजेतृभ्यः 'राष्ट्रिय-अनुभव-पुरस्कारः-२०२६' प्रदत्तः



कार्मिक-लोकशिकायत-निवृत्तिवेतनमन्त्रालयस्य (पेंशन) राज्यमन्त्रिणा डॉ. जितेन्द्रसिंहेन अद्य नवदेहल्यां पञ्चदशभ्यः (१५) चयनितविजेतृभ्यः 'राष्ट्रिय-अनुभव-पुरस्कारः-२०२६' समर्पितः। पुरस्कारविजेतारः राष्ट्रनिर्माणे, पारपत्रसेवाकेन्द्रेषु (Passport Seva Kendra), पुरातननियमानां निराकरणे नूतननियमानां च निर्माणे, प्रशासने प्राविधिकपरिवर्तने तथा च लेखाव्यवस्थायां स्वमहत्त्वपूर्णां भूमिकां निर्व्यूढवन्तः। 'अनुभव'-मञ्चः केन्द्रसर्वकारस्य सेवानिवृत्तेभ्यः सेवानिवृत्तोन्मुखेभ्यश्च कर्मचारिभ्यः, द्वादशभ्यः (१२) सार्वजनिकक्षेत्रस्य बङ्केभ्यः तथा केन्द्रीयसार्वजनिकक्षेत्रीयोपक्रमेभ्यः स्वीयान् शासकीयसेवाऽनुभवान् प्रकटयितुं सुवर्णमवसरं प्रददाति। अस्मिन् कार्यक्रमे 'पेंशन-मित्र-पुस्तिकायाः' राष्ट्रव्यापिनः 'डिजिटल-जीवनप्रमाणपत्र-अभियानस्य-५' च मार्गदर्शिका अपि प्रसारिता। डॉ. जितेन्द्रसिंहः अवदत् यत् सर्वकारः परिवर्तमानानां प्रशासनिक-सामाजिक-आवश्यकतानाम् अनुगुणं निवृत्तिवेतनप्रक्रियां निरन्तरं सरलीकरोति। निवृत्तिवेतनप्रपत्रेभ्यः (Forms) अनुचितप्रावधानाः निष्कासिताः जटिलाः विधयश्च सुगमाः कृताः। सः न्यवेदयत् यत् पारिवारिकनिवृत्तिवेतनस्य नियमाः अपि सुदृढाः कृताः, येषु योग्यानां कन्यानां परिवारस्य च इतरसदस्यानां प्रावधानाः अन्तर्भूताः सन्ति। सः निवृत्तिवेतनभोगीन् सेवानिवृत्तोन्मुखान् कर्मचारिणश्च नैरन्तर्येण स्वपरामर्शान् दातुं न्यवेदयत्, येन विभागः स्वसेवाप्रक्रियासु निरन्तरं परिष्कारं कर्तुं शक्नुयात्।

# महाविद्यालयेषु, विश्वविद्यालयेषु च 'ए.आई.' ड्रोन-प्रौद्योगिक्या सह भविष्यति क्रीडा- विज्ञानम्'- विषयस्य पाठनम्; उच्च- शिक्षा- परिषदः उपवेशने निर्णयः



**हिमसंस्कृतवार्ताः:- डॉ पद्मनाभः, शिमला।**

हिमाचलप्रदेशस्य महाविद्यालयेषु विश्वविद्यालयेषु च शीघ्रमेव कृत्रिमबुद्धिमत्ता, 'साइबर-सुरक्षा', 'दत्त-विश्लेषणम्', 'रोबोटिक्स', 'ड्रोनप्रौद्योगिकी', 'डिजिटल- विपणनम्', 'क्रीडा-विज्ञानम्', सदृशानाम् आधुनिकानां पाठ्यक्रमाणां विस्तारः द्रक्ष्यते। सोमवासरे राज्य-सचिवालये उच्च- शिक्षा- परिषदः उपवेशनस्य अध्यक्षतां कुर्वन् शिक्षामन्त्री रोहितठाकुरः अवदत् यत् अधुना शिक्षायाः उद्देश्यं केवलं उपाधि-वितरणं न, अपि तु छात्रान् आगामिवृत्तीनां, नूतनप्रौद्योगिकीनां परिवर्तमानानां वैश्विक-आह्वानानां च कृते सज्जीकरणं भवेत्।

जीविकोन्मुखानां कौशल-आधारितानां च विषयाणां प्रारम्भाय निर्देशाः उच्च-शिक्षा-विभागाय शिक्षण-संस्थानेभ्यश्च पाठ्यक्रमान् निरन्तरम् अद्यतनीकरणाय अधिकाधिकान् जीविकोन्मुखान् कौशल-आधारितांश्च विषयान् प्रारब्धुं निर्देशाः दत्ताः। शिक्षा-मन्त्रिणा उक्तं यत् कृत्रिम-बुद्धिमत्ता अधुना भविष्यस्य प्रौद्योगिकी न, अपि तु वर्तमानस्य आवश्यकता संजाता। सः 'राष्ट्रिय- शिक्षा- नीतिः- २०२०', 'प्रधानमन्त्री-उच्चतर- शिक्षा- अभियानस्य' अन्तः प्रचलन्तीनां योजनानां समीक्षां कुर्वन् तासां प्रभावकारी-क्रियान्वयनाय निर्देशान् अददात्। शिक्षण-संस्थानेभ्यः क्रीडा- प्रतिभाभ्यः श्रेष्ठ-सुविधाः उपलब्धं कारयितुं सहैव 'क्रीडाविज्ञानम्', आरोग्यम्, पोषणम् 'स्पोर्ट्स- मैनेजमेंट' सदृशान् आधुनिक-पाठ्यक्रमान् प्रारब्धुं सम्भावनानाम् अन्वेषणाय अपि निर्देशाः दत्ताः। उपवेशने उच्च-शिक्षा-परिषदः अध्यक्षः डॉ. सरबजोतसिंहबहलः, शिक्षा-सचिवः राकेशकँवरः, उच्च-शिक्षा-निदेशिका सुनीतासिंहः सहिताः परिषदः सदस्याः वरिष्ठाः अधिकारिणश्च उपस्थिताः आसन्।

## नूतन-युगस्य पाठने लक्ष्यम्-

उपवेशने 'साइबरसुरक्षा', 'डाटासाइंस', 'रोबोटिक्स', नवीकरणीय-ऊर्जा, 'जी.आई.एस.', 'ड्रोन-प्रौद्योगिकी', 'डिजिटल-विपणनम्' तथा च उद्यमिता-सदृशेषु नूतनेषु क्षेत्रेषु नूतन-पाठ्यक्रमान् प्रारब्धुं सम्भावनासु चर्चा कृता। एते विषयाः उद्योगानां याचनां भविष्यस्य च वृत्ति-विपणिं ध्याने निधाय विकसिष्यन्ते। शिक्षा-मन्त्रिणा उक्तं यत् शिक्षा-व्यवस्था वृत्ति-विपणेः परिवर्तनस्य प्रतीक्षां न कुर्यात्, अपि तु सम्भाव्य-आह्वानानां पूर्वमेव मूल्याङ्कनं कृत्वा युनः सज्जीकरणीयाः।

## हिमालयीय-विषयेषु वर्धिष्यते शोध-कार्यम्-

रोहितठाकुरेण हिमाचलस्य हिमालयीय-क्षेत्राणां च सम्बद्धेषु विषयेषु अनुसन्धानाय प्राथमिकतां दातुं बलं दत्तम्। जलवायु-परिवर्तनम्, जैव-विविधता, आपदा-प्रबन्धनम्, कृषिः, उद्यानपालनं, सतत-विकास-सदृशेषु क्षेत्रेषु शोध-गतिविधीः सुदृढाः विधातुं श्रेष्ठ-संरचनायै, अनुदानाय उद्योगैः सह सहभागितायै च बलं दत्तम्। तेन प्रोक्तं यत् नवोन्मेषस्य 'स्टार्ट-अप'-संस्कृतेः 'इंटर्नशिप' अवसराणां च विकासेन छात्राः शिक्षया सह वृत्तेः उद्यमितायाश्च अवसरैः योजयिष्यन्ते।

## छात्राणां मानसिक-स्वास्थ्ये अपि ध्यानम्-

शिक्षा-मन्त्रिणा महाविद्यालयेषु विश्वविद्यालयेषु च परामर्श-व्यवस्थां, वृत्ति-मार्गदर्शनं छात्र- सहायता-प्रणालीं च सुदृढं कर्तुं निर्देशाः दत्ताः। तेन उक्तं यत् छात्रेभ्यः केवलं शैक्षणिक-साहाय्यं न, अपि तु भावनात्मकं साहाय्यं व्यक्तित्व- विकासस्य अवसराश्च उपलब्धाः कारणीयाः, येन ते स्पर्धात्मके जगति आत्मविश्वासेन अग्रे गन्तुं शक्नुयुः।

# हिमाचलसर्वकारस्य बृहत्-निर्णयः- अधिकारिणां सेना न अपेक्षिता, कार्यशीलाः अपेक्षिताः; हिमाचले १५३ तः न्यूनीभूय १३० भविष्यन्ति 'आईएएस'-अधिकारिणः




**हिमसंस्कृतवार्ताः:- शिमला।**

हिमाचलसर्वकारः 'अखिल-भारतीयसेवा' इत्यस्याः अधिकारिणां पदेषु महतीं न्यूनतां कर्तुं गच्छति। मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः 'ओक ओवर' मध्ये माध्यमैः सह सम्भाषणं कुर्वन् 'आईएएस', 'आईएफएस', 'आईपीएस' पदेषु क्रियमाणायाः महत्याः न्यूनतायाः विवरणानि अपि प्राददत्। मुख्यमन्त्रिणा उक्तं यत् अधिकारिणां महती सेना न अपेक्षिता, अपि तु योजनानां क्रियान्वयनाय आवश्यक-अधिकारिणः अपेक्षिताः। ये अधिकारिणः देहलीं प्रति गन्तुम् इच्छन्ति, तेषां सञ्चिकाः पूर्वं स्थग्यन्ते स्म, किन्तु अधुना सर्वकारः झटिति तेभ्यः अनुमतिं यच्छति। 'आईएएस' पदानि १५३ तः न्यूनीकृत्य १३० करिष्यन्ते। मुख्यमन्त्रिणा प्रोक्तं यत् 'आईएएस' अधिकारिणां सङ्ख्या १०० तः ११० मध्ये भवेत्। अनेन प्रायः २०० कोटि-रूप्यकाणां व्ययः न्यूनः भविष्यति, यः जनसेवायां योजयितुं शक्यते। 'आईएफएस' इत्यस्य ११८ पदानि न्यूनीकृत्य ८३ क्रियमाणानि सन्ति। 'आईपीएस' पदानि अपि ९६ तः न्यूनानि करिष्यन्ते। पञ्चदश-अगस्त-दिनाङ्कस्य घोषणासु भाजपनेतृणां जयरामठाकुरस्य च प्रतिक्रियायाः उत्तरं यच्छन् मुख्यमन्त्रिणा उक्तं यत् विरोधप्रदर्शनं सर्वेषाम् अधिकारः अस्ति।

तेन विपक्षनेतारं प्रति प्रश्नः कृतः यत् सः जनतायाः स्वरं कदा उत्थापयिष्यति। भाजपा-सर्वकारः ऋणस्य १० सहस्र-कोटिरूप्यकाणां देयतां च राज्यसर्वकारस्य उपरि त्यक्त्वा गतः, चिन्ता नास्ति। केन्द्रेण राज्यसर्वकाराय 'आरडीजी' (राजस्व- हानि-अनुदानम्) स्थगितम्, यदा च विधानसभायाम् अस्य विषये चर्चा संजाता, तदा तेषां मुखात् ध्वनिः न निर्गता। मुख्यमन्त्रिणा उक्तं यत् 'आरडीजी'-स्थगनानन्तरम् अपि कस्यापि वेतनं निवृत्तवेतनं वा न अवरुद्धं, विकासकार्याणि अपि न स्थगितानि। अस्माभिः तु चतुर्थश्रेण्याः कर्मचारिभ्यः वेतनमान-अवशिष्टराशिं दातुम् आरम्भः कृतः। एषैव स्वावलम्बिनः हिमाचलस्य परिचयः अस्ति।



# शिमला-धर्मशालयोः धारासार-वृष्टिः, प्रदेशे ८७ मार्गाः अवरुद्धाः, चतुर्षु मण्डलेषु नारङ्ग- सचेतना

हिमसंस्कृतवार्ताः:- शिमला। हिमाचलप्रदेशस्य राजधान्यां शिमलायां धर्मशाला- सहितेषु बहुषु क्षेत्रेषु सोमवासरे अपराह्ने धारासारवृष्टिः अभवत्। सम्पूर्ण-प्रदेशे भूस्खलनेन मलिनावशेष-निपातनेन च ८७ मार्गाः आवागमनाय अवरुद्धाः संजाताः, यदा च अष्ट (८) पेय-जल-योजनाः चतस्रः (४) विद्युत्-परियोजनाः अपि प्रभाविताः अभवन्। ऋतु-विभागेन भौमवासरे चतुर्षु मण्डलेषु बिलासपुरं, काङ्गड़ा, मण्डी, सिरमौर- मण्डलेषु च महत्याः वर्षायाः नारङ्ग-सचेतना प्रसारिता। षट्सु मण्डलेषु शिमला, सोलनम्, ऊना, काङ्गड़ा, बिलासपुरं, हमीरपुर-मण्डलेषु च पीत-सचेतना प्रसारिता अस्ति। तत्रैव किन्नौर-लाहुल-स्पीति-मण्डलयोः ऋतुः स्वच्छः स्थास्यति इति अनुमानम् अस्ति।

राजधान्यां शिमलायां सोमवासरे प्रातःकाले ऋतुः स्वच्छः आसीत्। अपराह्णे नगरे धारासारं मेघाः अवर्षन्। धर्मशालायां तत्-परिसरेषु च प्रातः स्वच्छ-वातावरणानन्तरम् अपराह्णे तीव्रा वृष्टिः संजाता। गग्गल-विमानपत्तनात् विमानानां सञ्चालनं सामान्यम् आसीत्। कुल्लू- लाहुल- स्पीति- मण्डलयोः सोमवासरे ऋतुः स्वच्छः अभवत्, किन्तु पूर्वं सञ्जातानां भूस्खलनानां प्रभावः अद्यापि दृश्यते। कुल्लू-मण्डले ३३ मार्गाणां स्थगनेन सेब-ऋतौ उद्यानपालकानां चिन्ता वर्धिता अस्ति। फलानां वहनं प्रभावितं भवेत् इति आशङ्का प्रकटीकृता।

मण्डी-मण्डलस्य धर्मपुरक्षेत्रे वर्षायाः कारणेन रड़ासमीपे धर्मपुर-जोगिन्द्रनगरमार्गे मलिनावशेष-पाषाण- निपातनेन आवागमनं प्रायः सार्ध-घण्टां यावत् बाधितम् अभवत्। मार्गस्य उभयतः वाहनानां दीर्घाः पङ्क्यः संजाताः यात्रिकाश्च कष्टम् अन्वभवन्। ऊना-मण्डले प्रातः मध्याह्ने च बहुषु स्थानेषु लघ्व्याः मध्यममात्रायाः च वर्षा पञ्जीकृता। तदनन्तरम् आतप-प्रसारणेन ऋतुः मनोरमः संजातः। हमीरपुर-मण्डले आदिनं ऋतुः सामान्यः आसीत्। अधिकांश-समये आतपः विकीर्णः आसीत् सायं च मेघानाम् आवागमनं दृष्टम्।

राज्य-आपदा-प्रबन्धन-प्राधिकरणस्य अनुसारं प्रदेशे सर्वाधिक-मार्गाः कुल्लु, शिमला, काङ्गड़ा- मण्डलेषु प्रभाविताः सन्ति। प्रशासनेन संवेदनशील-क्षेत्रेषु वसद्भ्यः जनेभ्यः पर्यटकेभ्यश्च सतर्कतां पालयितुं परामर्शः दत्तः। ऋतु- विज्ञान- केन्द्रस्य अनुसारम् आगामिषु २४ होरासु (घण्टासु) बहुषु क्षेत्रेषु महत्याः वर्षायाः सम्भावना अस्ति, येन भूस्खलनस्य अकस्मात् जल-प्रवाहस्य च सङ्कटः वर्धितुं शक्नोति।

# प्रो. बिहारीलालशर्मा पुनः सम्पूर्णानन्द- संस्कृत- विश्वविद्यालयस्य कुलपतिपदे नियुक्तः; कुलाधिपतिना आनन्दीबेनपटेलवर्यया प्रसारितः आदेशः



**हिमसंस्कृतवार्ताः- वाराणसी।**
उत्तरप्रदेशस्य राज्यपालवर्यया, सम्पूर्णानन्द- संस्कृत- विश्वविद्यालयस्य कुलाधिपतिना आनन्दीबेनपटेल- महोदयया प्रो. बिहारीलालशर्मा पुनः त्रीणि वर्षाणि यावत् सम्पूर्णानन्द- संस्कृत- विश्वविद्यालयस्य (वाराणसी) कुलपतिरूपेण नियुक्तः कृतः।
अस्मिन् सन्दर्भे 'लोक-भवनम्' लखनऊ-तः १७ अगस्त २०२६ दिनाङ्के प्रसारिते आदेशे कुलाधिपतिना उक्तं यत् उत्तरप्रदेश- राज्य- विश्वविद्यालय- अधिनियम- १९७३ इत्यस्य धारा-१२ इत्यस्याः उपधारा-१ इत्यस्याः प्रदत्तशक्तीनां प्रयोगं कुर्वती सा प्रो. बिहारीलालशर्मामहोदयं कार्यभारग्रहणतिथेः आरभ्य वर्षत्रयस्य अवधये सम्पूर्णानन्द-संस्कृत- विश्वविद्यालयस्य कुलपति-पदे नियुङ्क्ते। ज्ञातव्यमस्ति यत् प्रो. बिहारीलालशर्मामहोदयः संस्कृतजगतः लब्धप्रतिष्ठः विद्वान्, कुशल-प्रशासकः, राष्ट्रियस्तरे च संस्कृत-प्रचार-प्रसारार्थं समर्पितः व्यक्तित्ववान् वर्तते। तस्य कार्यकालविस्तारेण संस्कृत- विद्वत्- समाजे हर्षस्य तरङ्गः व्याप्तः अस्ति।

**हिमसंस्कृतवार्ता-परिवारस्य पक्षतः अभिनन्दनम्**

प्रो. बिहारीलालशर्मा-महोदयस्य सम्पूर्णानन्द- संस्कृत- विश्वविद्यालयस्य कुलपतिपदे पुनर्नियुक्तौ सत्यां हिमाचल- राजकीय- संस्कृत- शिक्षक- परिषदः संरक्षकः, पूर्व-प्रदेशाध्यक्षः डॉ मनोजशैलः परिषदः प्रदेशाध्यक्षः कमलकान्तः गौतमः, महासचिवः डॉ. अमनदीपः शर्मा, पूर्वमहासचिवः डॉ. अमित शर्मा, वित्तसचिवः लोकपालः, सर्वैः सदस्यैः हिमसंस्कृतवार्ता-परिवारस्य समस्तसदस्यैः च तस्मै हार्दं वर्धापनं कार्तज्ञ्यं च व्याहृतम्।
डॉ मनोजशैलेन प्रोक्तं यत् प्रो. बिहारीलालशर्मा- महोदयस्य मार्गदर्शने सम्पूर्णानन्द- संस्कृत- विश्वविद्यालयः नूतनान् सोपानान् प्राप्स्यति संस्कृतशिक्षायाः च सर्वतोभावेन विकासः भविष्यति। समस्त- देवभूमिहिमाचल- संस्कृतपरिवारः तस्य यशस्वी-कार्यकालाय मङ्गलमयाः अनन्ताश्च शुभकामनाः प्रस्तौति।

# हिमाचले आपदा-साहाय्य-निधौ १३,००१ कोटि- रूप्यकाणां न्यूनता, उच्चन्यायालयेन केन्द्र- राज्यसर्वकारौ प्रति प्रकटिता तीव्रा असन्तुष्टिः

हिमसंस्कृतवार्ताः- शिमला।हिमाचल-उच्च- न्यायालयेन राज्ये आपदानन्तरं पुनर्वासकार्येषु कम्पनीभिः (संस्थाभिः) क्रियमाणे 'कार्पोरेट- सामाजिक- उत्तरदायित्व' निधेः वितरणावसरे दृश्यमानासु अनियमिततासु गम्भीरः असन्तोषः प्रकटितः। मुख्यन्यायाधीशस्य जी. एस. सन्धवालिया-महोदयस्य, न्यायाधीशस्य बिपिन- सी. नेगी- महोदयस्य खण्डपीठेन जनहित- याचिकायाः श्रवणं कुर्वता स्पष्टमुक्तं यत् केन्द्र- राज्य- सर्वकारौ परस्परम् उत्तरदायित्वम् आरोप्य स्वकीय-वैधानिक- उत्तरदायित्वात् पलायनं कर्तुं न शक्नुतः।
न्यायालयेन दृढा सचेतना दत्ता यत् यदि उभौ सर्वकारौ अस्मिन् विषये दृढ़-पदानि न गृह्णीतः, तर्हि तयोः उपरि गुरुतरः दण्डः विधास्यते। राज्य- सर्वकारेण न्यायालयः सूचितः यत् हिमाचलप्रदेशे गतेषु त्रिषु वित्तीय-वर्षेषु सम्भूताभिः आपद्भिः प्रायः १७,४२८ कोटि-रूप्यकाणां क्षतिः आकलिता वर्तते।

## आपदापुनर्वासकार्येषु १३,००१ कोटि- रूप्यकाणां न्यूनता

अस्याः बृहत्-क्षतेः सम्मुखे साहाय्य- पुनर्निर्माण- जीर्णोद्धार- कार्येषु केवलं ४,४२७.६८ कोटि- रूप्यकाणि एव व्ययीकृतानि। प्रदेशे आपदा- पुनर्वास- कार्यार्थम् अद्यापि १३,००१ कोटि- रूप्यकाणां महती न्यूनता वर्तते। हिमाचलसर्वकारः एतां न्यूनतां पूरयितुम् उत्तराखण्डस्य ओडिशाराज्यस्य च 'सीएसआर' प्रारूपाणां अध्ययनं कुर्वन् अस्ति।
उच्चन्यायालयेन दृष्टं यत् हिमाचलप्रदेशे सक्रियरूपेण कार्यरताः सर्वकारीयाः वैयक्तिकाश्च कम्पन्यः 'कम्पनी-अधिनियम- २०१३' इत्यस्य धारा- १३५(५) इत्यस्याः नियमानाम् उल्लङ्घनं कुर्वन्ति। नियमानुसारं संस्थाभिः स्वकीय- कार्यक्षेत्रस्य स्थानीय-भागाय प्राथमिकता दातव्या, किन्तु अङ्केषु महती विषमता प्राप्ता। उदाहरणार्थं 'नेशनल थर्मल पावर कॉर्पोरेशन' संस्थया हिमाचलप्रदेशे वित्तीय-वर्षे २०२२-२३ मध्ये १.५८ कोटि, २०२३-२४ मध्ये केवलं २.२२ कोटिरूप्यकाणां 'सीएसआर' धनराशिः व्ययीकृता।
अस्य विपरीतं 'एनटीपीसी'-संस्थया उत्तर प्रदेशाय (२०२३-२४ मध्ये) ४०.१६ कोटि, बिहाराय २४.१० कोटि, महाराष्ट्राय २९.८७ कोटि, ओडिशाराज्याय च १८.८३ कोटि-रूप्यकाणां विपुला धनराशिः प्रदत्ता। न्यायालयेन अङ्कितं यत् हिमाचलप्रदेशः, अरुणाचलप्रदेशः, पञ्जाबः, तमिलनाडुः, लेह- लद्दाख- सदृशेभ्यः राज्येभ्यः कुल-निधेः केवलं 'नाममात्रः' भागः लब्धः, यत् सर्वथा अनुचितम् अस्ति।

**दोषी-कम्पनीनां विरुद्धं कार्यानुष्ठानस्य निर्देशः**

न्यायालयस्य सम्मुखम् एतदपि प्रकटितं यत् राज्ये कार्यरताः ८१ कम्पन्यः अद्यापि स्व-देय-राशेः आवश्यकविवरणं विभागाय न दत्तवत्यः। अपि च, केन्द्रीय-कम्पनी-कार्य-मन्त्रालयस्य राज्यस्य च शपथपत्रेषु उपलब्धानाम् अङ्कानां मध्ये महद् अन्तरं दृश्यते। केन्द्रसर्वकारेण एनटीपीसी, एनएचपीसी, एसजेवीएन, एनएचएआई-सदृशानां बृहत्- सार्वजनिक- उपक्रमाणां हिमाचले व्यय-विषये मौनम् अवलम्बितम्।

# विश्वसंस्कृतदिनस्य उपलक्ष्ये 'श्रीआद्यशङ्कराचार्य- संस्कृतस्तोत्रपाठनस्पर्धा- २०२६' जळगावमहानगरस्य विद्यालयीयछात्राणां कृते संस्कृतस्तोत्रपाठनस्य विशेषः उपक्रमः

**हिमसंस्कृतवार्ताः- जळगावम्।**
के.सी.ई. संस्थायाः मूलजी जेठा स्वायत्त- महाविद्यालयस्य स्वामी विवेकानन्द- कनिष्ठ- महाविद्यालयस्य संस्कृतविभागेन विश्वसंस्कृतदिनस्य पावनावसरे 'श्रीआद्यशङ्कराचार्य- संस्कृतस्तोत्रपाठनस्पर्धा– २०२६' इति महानगरस्तरीयायाः स्पर्धायाः आयोजनं क्रियते।
संस्कृतभाषायाः प्रचारः, प्रसारः, संरक्षणं च भवेत्, छात्रेषु संस्कृतभाषायाः प्रति अनुरागः वर्धेत तथा च भारतीयसंस्कृतेः आध्यात्मिकपरम्परायाः परिचयः छात्राणां भवेत् इत्येतदर्थं स्पर्धायाः आयोजनं भवति।
स्पर्धा मङ्गलवासरे, दिनाङ्के २५-०८-२०२६ तमे दिने प्रातः ११ वादने स्वामी विवेकानन्दभवने, मूलजी जेठा स्वायत्तमहाविद्यालये, जळगावनगरे आयोजयिष्यते।
**द्वयोः वर्गयोः स्पर्धा-** स्पर्धा कक्षा- नवम्याः, कक्षा- दशम्याः च छात्राणां कृते द्वयोः वर्गयोः आयोजिता अस्ति। कक्षा- नवम्याः छात्राणां कृते 'श्रीकृष्णाष्टकम्' तथा कक्षा- दशम्याः छात्राणां कृते 'श्रीरुद्राष्टकम्' इति स्तोत्रद्वयं निर्धारितम् अस्ति।
प्रत्येकस्मिन् वर्गे न्यूनातिन्यूनं सप्तच्छात्राः अधिकतमं दश छात्राः च एकस्य विद्यालयस्य प्रतिनिधित्वेन भागं ग्रहीतुं शक्नुवन्ति।
**शुद्धोच्चारणस्य भावपूर्णपाठस्य च महत्त्वम्-** स्पर्धायां छात्राणां मूल्याङ्कनं शुद्धोच्चारणम्, पाठस्मरणम्, स्वरः, लयः, गतिः, भावपूर्णप्रस्तुतिः, आत्मविश्वासः तथा समूहरूपेण सादरीकरणम् इत्यादिभिः निकषैः भविष्यति। अतः छात्रैः केवलं स्तोत्रस्य कण्ठस्थीकरणं न कृत्वा शुद्धोच्चारणेन, समुचितस्वरेण, लयेन, भावेन च स्तोत्रस्य प्रस्तुतीकरणं करणीयम्।

**विजेतृभ्यः पारितोषिकानि**

प्रत्येकस्मिन् वर्गे प्रथम- द्वितीय- तृतीय- स्थानप्राप्तिभ्यः, द्वाभ्यां प्रोत्साहन- पारितोषिक- प्राप्तिभ्यः संघेभ्यः रोखपारितोषिकैः प्रमाणपत्रैः विद्यालयस्य सम्मानचिह्नेन च सम्माननं करिष्यते।
प्रथमस्थानाय रु. १५०१, द्वितीयस्थानाय रु. १००१, तृतीयस्थानाय रु. ७०१, प्रत्येकस्मै प्रोत्साहन- पारितोषिकाय रु. ५०१ इति पारितोषिकराशिः निर्धारितास्ति।
सर्वेषु वर्गेषु सर्वाधिकगुणान् प्राप्तवते विद्यालयाय 'डा. अण्णासाहेब जी. डी. बेंडाळे चलनशीलः कपः' इति विशेषसम्मानः प्रदास्यते। स्पर्धायां भागं गृह्णतां सर्वेषां छात्राणां कृते सहभागिताप्रमाणपत्रं प्रदास्यते।
भारतीयसंस्कृतेः परिचयाय विशेषः उपक्रमः स्तोत्रपाठनसमये छात्रैः तबला-पेटी इत्यादीनां वाद्ययन्त्राणां साथं स्वीकर्तुं शक्यते। आवश्यकवाद्यसामग्री स्पर्धकविद्यालयेन वा स्पर्धकैः स्वयमेव आनेतव्या भविष्यति। प्रत्येकस्मिन् संघे एकः छात्रः श्रीकृष्णस्य अथवा भगवान् शिवस्य वेशभूषां धारयितुं शक्नोति। परन्तु वेशभूषायै पृथक् गुणाः न दीयन्ते।

**अधिकाधिकभागग्रहणाय आह्वानम्-**

*संस्कृतभाषायाः संरक्षणाय, संवर्धनाय, छात्रेषु संस्कृतभाषायाः प्रति प्रेमभावस्य निर्माणाय तथा भारतीयज्ञानपरम्परायाः परिचयाय अयं स्पर्धात्मकः उपक्रमः अत्यन्तं महत्त्वपूर्णः अस्ति। अतः जळगावमहानगरस्य सर्वेषां विद्यालयानां संस्कृतशिक्षकैः छात्रैः च उत्साहपूर्वकं स्पर्धायां भागं गृहीत्वा संस्कृतभाषायाः गौरवं वर्धयितुम् आयोजकसंस्थया विनम्रतया आह्वानं कृतम् अस्ति।*
*'संस्कृतं संस्कृतेः मूलम्, संस्कृतं भारतीय- ज्ञान- परम्परायाः अमूल्यं निधिः।'*
*अस्याः स्पर्धायाः माध्यमेन छात्रेषु संस्कृतभाषायाः प्रति अनुरागः, शुद्धोच्चारणस्य संस्कारः, आत्मविश्वासः, भारतीयसंस्कृतेः प्रति गौरवभावना च निश्चितरूपेण वर्धिष्यते।*

# स्थापनादिवसस्यावसरे विश्वविद्यालयपरिसरे सार्थकविमर्शः

## "वैश्विकस्तरे वैदिकसंस्कृतेश्च प्रतिष्ठापनाय विश्वविद्यालयः प्रतिबद्धः भविष्यति" – कुलगुरुः प्रो. शिवशङ्करमिश्रः






**हिमसंस्कृतवार्ताः- डॉ.विजयकुमारः 17 अगस्त।** उज्जयिनीस्थ, महर्षिपाणिनिसंस्कृतवैदिक-विश्वविद्यालयस्य अष्टादशः स्थापनादिवससमारोहः आचरितः। "विश्वविद्यालयस्य उत्कर्षः—एकः विमर्शः" इति विषयमधिकृत्य अयं कार्यक्रमः आयोजितः। विश्वविद्यालयस्य स्थापनायाः अष्टादशवर्षाणां पूर्त्यावसरे माननीयकुलगुरोः प्रो.शिवशङ्करमिश्रवर्यस्य अध्यक्षतायां विमर्शकार्यक्रमः सम्पन्नः। कार्यक्रमस्य शुभारम्भः राष्ट्रगीतम् "वन्देमातरम्" इत्यस्य गायनेन अभवत्। अयं संवादात्मकः कार्यक्रमः माननीयकुलगुरोः प्रेरणया निर्देशनेन चायोजितः। कार्यक्रमे प्रशासनिकाधिकारिणः, शिक्षकाः, कर्मयोगिबान्धवाः तथा च छात्राः सक्रियतया सहभागितां कृतवन्तः। विश्वविद्यालयस्य सर्वाङ्गीणोत्कर्षं लक्ष्यीकृत्य प्राशासनिक-शैक्षणिकान्यगतिविधीनां सञ्चालन-सम्बद्धानां विविधविषयाणां, विश्वविद्यालयस्योन्नत्यर्थं प्रस्तावितानां योजनानां च विषये विस्तृतः विमर्शो विहितः। अस्मिन् क्रमे शिक्षकैः, कर्मचारीबन्धुभिः तथा च छात्रैश्च (शुभम- मेघा-कृष्णकुमारेण च) महत्त्वपूर्णाः विचाराः प्रकटिताः। तेषां विचाराणां क्रियान्वयनाय माननीयकुलगुरुणा आश्वासनमपि प्रदत्तम्। माननीयकुलगुरुणा उक्तं यत् प्रतिवर्षमेकं नूतनं महाविद्यालयं अथवा संस्थां संस्कृतेन सह संयोजनाय विश्वविद्यालयस्य उद्देश्यम् भवेत् । तेन न केवलं मध्यप्रदेशे, अपितु सम्पूर्णदेशे तथा च अन्ताराष्ट्रीयस्तरेऽपि विश्वविद्यालयस्य कार्यक्षेत्रं विस्तारयितुं संकल्पः प्रकटितः। अनुसन्धानक्षेत्रेऽपि नूतनानाम् आयामानां स्थापनाय, नवाचारस्य प्रोत्साहनाय तथा च प्रदेशस्य देशस्य च अन्याभिः संस्थाभिः सह समन्वयपूर्वकं कार्यं कृत्वा संस्कृतस्य प्रचार-प्रसाराय विश्वविद्यालयः निरन्तरं प्रयासं करिष्यति। तेन विशेषतया उक्तं यत् विश्वविद्यालयस्य मूलभूताङ्गाः छात्राः सन्ति। अतः छात्राणां कृते उत्तमव्यवस्थानां निर्माणम्, शिक्षणक्षेत्रे नूतनानां प्रयोगाणां क्रियान्वयनम् तथाच संस्कृतोन्नत्यर्थं निरन्तरप्रयत्नं विश्वविद्यालयस्य प्रथमं दायित्वम् अस्ति।कुलगुरुणा उक्तं दिवसोऽयं उत्सवस्य दिवसः न, अपितु विमर्शस्य दिवसोऽस्ति। संस्कृतेः, संस्कृतविश्वविद्यालयस्य च माध्यमेन समाजं जागरूकं कर्तुं ये कार्यक्रमाः क्रियान्वितव्याः तेषां विषये गम्भीरतया विचारः करणीयः तथा तेषां धरातले प्रभावी क्रियान्वयनं सुनिश्चितं करणीयम्।

समस्तमहाशयानां प्रस्तावनां स्वागतञ्च व्याकरणाध्यक्षाः डॉ . अखिलेशकुमारद्विवेदी वर्याः अकुर्वन्। माननीयकुलगुरुः विश्वविद्यालयपरिवारस्य सर्वान् सदस्यान् दायित्वस्य निर्वहणं समर्पणेन निष्ठया च कर्तुं प्रेरितवान्। भारतीयज्ञानपरम्परायाः महत्त्वं प्रतिपादयन् सोऽवदत् वैदिकज्ञानपरम्परायाः संरक्षणाय प्रसाराय च अयं विश्वविद्यालयः सदैव प्रतिबद्धः

भविष्यति।सुवसरेऽस्मिन् माननीयकुलगुरुणा सह विश्वविद्यालयपरिवारस्य सर्वेसदस्याः वृक्षारोपणमपि कृतवन्तः। उक्तकार्यक्रमस्य संयोजनं विभागसमन्वयकेन डा.तुलसीदासपरौहामहोदयेन कृतम्। कार्यक्रमे धन्यवादज्ञापनं डॉ.सङ्कल्पमिश्रेण कृतम्। कार्यक्रमे वित्तनियन्त्रिका श्रीमती नानबाई जमरा, समस्ताः विभागाध्यक्षाः, शिक्षकाः, कर्मयोगिबान्धवाः तथा छात्राश्च सक्रियतया उपस्थिताः आसन्।

# लनामिवि-संस्थायाः एनएसएस-शिबिरे स्वयंसेवकैः शिक्षितानि आपदा-प्रबन्धन-कौशलानि; जलप्लावन-रक्षणस्य प्राथमिकोपचारस्य च प्राप्तं प्रशिक्षणम्

**हिमसंस्कृतवार्ता राघव नाथ झा।** ललितनारायण-मिथिला-विश्वविद्यालयस्य (लनामिवि) राष्ट्रिय-सेवा-योजना-प्रकोष्ठस्य (NSS) तत्त्वावधाने बिहार-राज्य-आपदा-प्रबन्धन-प्राधिकरणस्य (BSDMA) सहयोगेन आयोजिते सप्तदिवसीय-आवासीय-आपदा-प्रबन्धन-प्रशिक्षण-शिबिरे द्वितीये दिवसे सोमवासरे स्वयंसेवकेभ्यः जलप्लावन-रक्षणस्य, प्राथमिकोपचारस्य जीवनरक्षक-तन्त्राणां च व्यावहारिकं प्रशिक्षणं प्रदत्तम्। अस्मिन् शिबिरे समस्तीपुर-जनपदस्य द्विशतं स्वयंसेवक-च्छात्र-च्छात्राः प्रतिभागं कुर्वन्ति।

कार्यक्रमस्य शुभारम्भः राष्ट्रगीतेन एनएसएस-लक्ष्यगीतेन च अभवत्। उद्घाटनं कुर्वन् एनएसएस-समन्वयकः डॉ. आर. एन. चौरसिया अकथयत् यत् आपदा-प्रबन्धनस्य प्रशिक्षणं केवलं शिबिरं यावत् सीमितं न भविष्यति, अपि तु जीवनपर्यन्तं समाजस्य दीनानां च साहाय्ये उपयोगी भविष्यति।

बिहटा-स्थितस्य राज्य-आपदा-प्रतिवादन-बलस्य (SDRF) प्रशिक्षकैः जलप्लावनसदृशीषु प्राकृतिक-आपदासु सुरक्षारक्षणस्य उपायाः प्रदर्शिताः। प्रशिक्षकेन खोखो-कुमारेण मज्जतः जनस्य रक्षणार्थं विविधाः विधयः, दूषितजलस्य शुद्धीकरणप्रक्रिया तथा च गृहे उपलभ्यमानैः साधनैः अस्थायी-तरण्ड-निर्माणस्य (Raft) उपायाः प्रदर्शिताः। सः 'थ्रो' (प्रक्षेपः), 'रीच' (प्रापणम्), 'वेडिंग' (जले गमनम्), 'ह्यूमन चेन' (मानव-शृङ्खला) इति शुष्क-रक्षण-विधिभिः सह 'चिन टो', 'हेड टो', 'आर्म टो', 'क्रॉस टो' इत्याद्यानां तरण-रक्षण-विधीनां विषये अपि ज्ञानम् अयच्छत्।



प्रशिक्षकैः सूचितं यत् रक्षणकाले यदि मज्जन् जनः रक्षकं गृह्णीयात्, तर्हि स्वस्य सुरक्षायै विमुक्ति-तन्त्रं ततः परं प्राथमिकोपचार-प्रदानस्य यथार्थप्रक्रिया अनुसरणीया।

द्वितीये प्राविधिक-सत्रे रूपेश-कुमार-पासवानेन राजू-कुमारेण च प्राथमिकोपचारे प्रयुज्यमानानाम् उपकरणानां प्रदर्शनं कृतम्। स्वयंसेवकेभ्यः सीपीआर-प्रदानस्य (हृत्-फुप्फुस-पुनरुज्जीवनस्य) समुचिता रीतिः, प्राणवायु-कूपी (Oxygen cylinder), रक्तचापमापक-यन्त्रम्, तापमापकम् (थर्मामीटर), एम्बू-स्यूतः, मुखावरणं (Face mask) तथा च अन्यानां चिकित्सोपकरणानां प्रयोगस्य प्रशिक्षणं दत्तम्।

रक्तस्राव-नियन्त्रणस्य विशेष-प्रशिक्षणे बाह्य-रक्तस्राव-निवारणाय प्रत्यक्ष-पीडनम् (Direct pressure), उत्थापनम् (Elevation), पीडन-बिन्दुः (Pressure point), 'टॉर्निकेट'-तन्त्रं तथा च आन्तरिक-रक्तस्रावे 'राइस' (विश्रामः, हिमम्, सम्पीडनम्, उत्थापनम् - RICE) पद्धतेः विषये पाठितम्। प्रशिक्षकैः स्पष्टीकृतं यत् दुर्घटनायां शरीरस्य समग्र-रक्तस्य प्रायः त्रिभागैकः स्रवेत् चेत् जनस्य जीवनं सङ्कटापन्नं भवितुम् अर्हति, अतः समये प्राथमिकोपचारः अतीव आवश्यकः अस्ति।

शिबिरे दरभङ्गा-सदर-रुग्णालयस्य साहाय्येन रुग्णवाहनस्य (Ambulance) चिकित्सा-सुविधायाः च व्यवस्था कृता। सायं सांस्कृतिकोत्सवस्य आयोजनं जातम्। कार्यक्रमस्य सञ्चालने विश्वविद्यालयस्य प्राध्यापकाः एनएसएस-अधिकारिणः च सक्रियरूपेण सहयोगम् अकुर्वन्।

# जयजलाराम-आयुर्वेदिक-चिकित्सा-महाविद्यालये महर्षिचरकजयन्तीसमारोहः-२०२६ चरकप्रज्ञया प्रकाशिता आयुर्वेदज्ञानपरम्परा




**हिमसंस्कृतवार्ता, 17 अगस्त।** जयजलाराम-आयुर्वेदिक-मेडिकल-महाविद्यालयः, शिवपुरी, गोधरा इत्यत्र प्रेरणा-चैरिटेबल-ट्रस्ट्-संस्थायाः मार्गदर्शनेन महर्षिचरकजयन्तीसमारोहः–२०२६ हर्षोल्लासेन गरिमापूर्णेन च वातावरणेन समायोजितः। कार्यक्रमः संहितासिद्धान्त-संस्कृतविभागस्य तथा संस्कृत-क्लबस्य तत्त्वावधाने आयोजितः।समारोहस्य शुभारम्भः दीपप्रज्वलनेन, धन्वन्तरिस्तवनेन तथा विश्वविद्यालयगीतस्य गायनेन अभवत्। ततः अतिथीनां पौधप्रदानेन सत्कारः कृतः। महर्षिचरकस्य जीवनस्य, कृतित्वस्य, आयुर्वेदक्षेत्रे तेन कृतस्य अमूल्ययोगदानस्य च परिचयः प्रस्तुतः। विद्यार्थिभिः चरकसंहितायाः सूत्रस्थानस्य नवमाध्यायस्य सस्वरं पाठनमपि कृतम्। चरकजयन्त्याः उपलक्ष्ये महाविद्यालयस्य परिसरे चरकसंहितायाः पालखीयात्रा अपि आयोजिता। अस्यां यात्रायां विद्यार्थिनः शिक्षकगणाश्च उत्साहपूर्वकं सहभागी अभवन्। अनेन आयोजनेन विद्यार्थिभ्यः चरकसंहितायाः आयुर्वेदस्य च समृद्धायाः ज्ञानपरम्परायाः प्रत्यक्षपरिचयस्य अवसरः प्राप्तः। जयन्तीसमारोहस्य अन्तर्गतं विद्यार्थिनां सृजनात्मक-शैक्षणिक-प्रतिभानां प्रोत्साहनाय विविधाः प्रतियोगिताः आयोजिताः। तासु "Letter to Acharya Charak" पत्रलेखन-प्रतियोगिता, ई-पोस्टर-प्रतियोगिता तथा Charak Samhita Quiz इत्येताः प्रमुखाः आसन्। तदतिरिक्तं संस्कृतभारती-पञ्चमहलस्य सहयोगेन राष्ट्रीयस्तरीया Reel Making Competition इति प्रतियोगिता आयोजिता। अस्यां प्रतियोगितायां देशस्य विभिन्नेभ्यः भागेभ्यः कुलं ५६ प्रविष्टयः प्राप्ताः। तासु श्रेष्ठतमप्रस्तुतिभ्यः त्रयः विजेतारः चयनिताः, तेभ्यः च नगदपुरस्काराः प्रमाणपत्राणि च प्रदत्तानि।

समारोहस्य अवसरे सर्वासां प्रतियोगितानां विजेतृभ्यः पुरस्काराः प्रमाणपत्राणि च प्रदाय तेषां प्रतिभायाः सम्मानः कृतः। विद्यार्थिभिः प्रस्तुतः स्वागतनृत्यकार्यक्रमः समारोहस्य सांस्कृतिकशोभां वर्धितवान्। अतिथीनां प्रेरणादायकैः उद्बोधनैः मार्गदर्शनेन च विद्यार्थिनः आयुर्वेदस्य अध्ययनं, अनुसन्धानं, चिकित्साक्षेत्रे च उत्कृष्टतां प्राप्तुं प्रेरिताः। कार्यक्रमे महाविद्यालयस्य प्रभारीप्राचार्यः डॉ. संजयकांबले-महोदयः गरिमामयी उपस्थितिं प्रदत्तवान्। तेन सह डॉ. वेणुगोपालः, डॉ. सन्दीपः, डॉ. स्वाती, डॉ. अक्षया, डॉ. अञ्जली, डॉ. बंसरी, डॉ. रवीना, डॉ. विशालः, डॉ. अङ्कितः, डॉ. अनन्तः तथा डॉ. ज्योतिका इत्यादयः शिक्षकगणाः उपस्थिताः आसन्। सर्वे शिक्षकाः विद्यार्थिनश्च कार्यक्रमस्य सफलतायै सक्रियतया सहयोगं सहभागितां च कृतवन्तः।

कार्यक्रमस्य सुगमं सफलं च सञ्चालनं डॉ. प्रारब्धेन तथा डॉ. अजयेन कृतम्। आयोजनस्य सफलतायां संहितासिद्धान्त-संस्कृतविभागस्य विभागाध्यक्षः डॉ. भाद्रेशपटेलः, डॉ. विद्यामहोदया तथा डॉ. चिरागपुरोहितः डॉ. प्रारब्धा तथा डॉ. अजय महोदय सहितं समस्तशिक्षकवर्गस्य विद्यार्थिवर्गस्य च महत्त्वपूर्णं योगदानम् आसीत्।

कार्यक्रमस्य अन्ते डॉ. चिरागपुरोहितेन आभारप्रदर्शनम् कृतम्। तेन महाविद्यालयस्य प्रबन्धनं, प्रभारीप्राचार्यं, समस्तशिक्षकगणं, विद्यार्थिवर्गं तथा आयोजनस्य सफलतायै सहयोगं कृतवन्तः सर्वान् प्रति हार्दिकं कृतज्ञतां प्रकटितम्।

तदनन्तरं राष्ट्रगीतस्य सामूहिकगायनेन समारोहस्य गरिमापूर्णं समापनम् अभवत्।

सम्पूर्णेन कार्यक्रमेण महर्षिचरकस्य ज्ञानस्य, विचाराणां तथा आयुर्वेदस्य गौरवशालिन्याः परम्परायाः प्रति विद्यार्थिषु श्रद्धा, जिज्ञासा, अध्ययनशीलता च अधिकतया सुदृढा अभवत्।

***— संहितासिद्धान्त-संस्कृतविभागः तथा संस्कृत-क्लबः। जयजलाराम-आयुर्वेदिक-मेडिकल-महाविद्यालयः शिवपुरी, गोधरा, गुजरातम्***

# सुलतानगञ्जस्य अजगैबीनाथ-क्षेत्रात् पञ्चत्रिंशल्लक्षाधिकाः काँवरयात्रिणः देवघरनगरं प्रति प्रस्थितवन्तः



**हिमसंस्कृतवार्ताः- डा. विमलेश झा, सुल्तानगंजः, भागलपुरम्, बिहार**

बिहारराज्यस्य सुलतानगञ्जनगरस्य अजगैबीनाथक्षेत्रे श्रावणमासस्य तृतीयसोमवासरे श्रद्धालूनां विशालः जनसमूहः समुपस्थितः। प्रातःकालादेव सम्पूर्णं क्षेत्रं केसरियावस्त्रधारिभिः काँवरयात्रिभिः समाच्छादितं जातम्। गङ्गातटात् आरभ्य मन्दिरपरिसरं यावत् "हर-हर महादेव" तथा "बोल बम" इति जयघोषैः सम्पूर्णं वातावरणं शिवमयं जातम्। श्रद्धालवः उत्तरवाहिन्याः गङ्गायाः पवित्रं जलं काँवरेषु पूरयित्वा परमश्रद्धया बाबावैद्यनाथनगरीं प्रति पदयात्रां समारब्धवन्तः। अनेकैः यात्रिभिः उक्तं यत् मार्गस्य क्लेशोऽपि महादेवस्मरणेन सहजतया लुप्तप्रायो भवति।प्रशासनिक-विवरणानुसारं श्रावणमेलकस्य आरम्भदिवसात् अद्यपर्यन्तं एकोनविंशतिदिनेषु पञ्चत्रिंशल्लक्षाधिकाः काँवरयात्रिणः गङ्गाजलं गृहीत्वा देवघरनगरं प्रति प्रस्थितवन्तः। तृतीयसोमवासरे यात्रीणां संख्या विशेषरूपेण वर्धिता, काँवरियामार्गे बहुकिलोमीटरपर्यन्तं केसरियावस्त्रधारिणां दीर्घाः पङ्क्तयः दृष्टाः। श्रद्धालूनां सुरक्षासुविधयोः दृष्ट्या प्रशासनेन विशिष्टाः प्रबन्धाः कृताः। प्रशासनेन गङ्गाघाटेषु आरक्षीबलस्य, जलमज्जकानाम् अन्यसुरक्षाकर्मचारिणां च नियुक्तिः कृता अस्ति। जनसम्मर्दनियन्त्रणाय काँवरियामार्गे निरन्तरं निरीक्षणकार्यं भवति। ड्रोनयानैः सीसीटीवीयन्त्रैः च अपि सर्वत्र निरीक्षणव्यवस्था कृता वर्तते।

सम्पूर्णयात्रा भक्तिभावेन, अनुशासनेन विघ्नबाधां विना च सम्पन्ना भवेत् एतस्य कृते मण्डलप्रशासनं तत्परं विद्यते। सर्वत्र मार्गेषु जनाः कांवरयात्रीणां सुलभयात्रायै तत्पराः सन्ति। मार्गे यात्रीणां कृते अल्पाहारव्यवस्था, चाय-जलपानव्यवस्था, भोजनव्यवस्था विश्रामव्यवस्था च निश्शुल्कं विद्यते। व्यक्तिगत रूपेण अपि बहवः जना मार्गे स्थित्वा एव जलं, फलानि, मधुरपेयपदार्थम् इत्येतानि वस्तूनि वितरन्तः दृष्टिगोचराः अभवन्। अस्मिन् कार्ये बहव्यः सामाजिकसंस्थाः अपि सक्रियाः सन्ति।

# वार्ता-संवादः

**हिमसंस्कृतवार्ताः, ईदरधीररजः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। मया एका विचित्रा वार्ता पठिता। एकस्मिन् उत्सवे एकः कपोतः न उड्डीनः अस्ति। अतः क्रुद्धेन अधिकारिणा दण्ड-निर्णयः याचितः।

**नन्दिनी-** अहो! कपोतस्य दोषेण अन्यः अधिकारी दण्डितः इति अतीव हास्यास्पदम्। मया अपि ध्रुव-प्रदेशस्य एका वार्ता श्रुता। हिम-खण्डे एकः श्वेत-भल्लूकः सुप्तवान् अस्ति। यात्रिकाणां चित्र-ग्रहणाय केनचित् पोत-चालकेन महाध्वनिः कृतः। भल्लूकस्य निद्राभङ्गात् सः चालकः अधिकारिभिः महा-धनेन दण्डितः।

**काव्या-** पशोः विश्रामः रक्षितः! सम्यक् दण्डः दत्तः। कृत्रिम-प्रज्ञया अपि एका विचित्रा घटना दृष्टा। वञ्चकैः यात्रिकाणां चित्राणि दृष्टानि। चित्र-पृष्ठभागेन एव यात्रिकाणां स्थानं ज्ञातम्। ततः तैः वञ्चकैः धन-वञ्चना-सन्देशाः प्रेषिताः।

**नन्दिनी-** अहो, वञ्चकैः नूतनः उपायः चिन्तितः! अस्माभिः जागरूकैः भाव्यम्। अन्तिमा वार्ता अपि मया दृष्टा। एकेन पुरुषेण विमानस्य पान-शकटं नगर-मार्गेषु नोदितम्। तेन जनेन बहु-दूरं यावत् तत् शकटं चालितम्। स्व-मृतमित्राणां स्मरणाय अयं विस्तीर्ण-मार्गः आक्रान्तः।

**काव्या-** आश्चर्यकरः यत्नः कृतः तेन! अद्य सर्वे वृत्तान्ताः अतीव विचित्राः सन्ति।

**नन्दिनी-** सत्यम् उक्तं त्वया। अद्यतनः कार्यक्रमः अत्रैव समाप्तः।

# राज्यसभा-सांसदः सञ्जय-झा दरभङ्गा-नगरस्य प्रमुखाणां विकास-परियोजनानां समीक्षाम् अकरोत्; समये गुणवत्तायुक्त-कार्य-समाप्तये निर्देशाः दत्ताः



हिमसंस्कृतवार्ता। राघव नाथ झा। राज्यसभा-सांसदः सञ्जय-कुमार-झा सोमवासरे दरभङ्गा-नगरस्य विविधानां महत्त्वपूर्ण-विकास-परियोजनानां निरीक्षणं कृत्वा निर्माण-कार्याणां प्रगतेः समीक्षाम् अकरोत्। सः नूतन-विमानपत्तन-प्रवेशभवनाय (Airport Terminal Building), दिल्ली-मोड़-बस-स्थानकाय, मिथिला-शोध-संस्थानाय तथा च निर्माणाधीन-उन्नतमार्गाय (Elevated Road) स्थल-निरीक्षणं विधाय अधिकारिभ्यः निर्धारित-समय-सीमायां गुणवत्तापूर्ण-कार्य-सम्पन्नाय निर्देशम् अयच्छत्। निरीक्षणकाले जनपद-दण्डाधिकारी (DM) कौशल-कुमारः, वरिष्ठ-आरक्षी-अधीक्षकः (SSP) जगुनाथ-रेड्डी-जला-रेड्डी, विविध-विभागानां वरिष्ठाधिकारिणः, अभियन्तारः सम्बन्धित-कार्यकारी-संस्थानां प्रतिनिधयः च उपस्थिताः आसन्।
सांसदः सर्वासाम् अपि परियोजनानां वर्तमान-प्रगतेः, निर्माणकार्य-स्थितेः, निर्धारित-समय-सीमायाः कार्ये उत्पन्नानां बाधानां च विस्तरेण विवरणम् अधिकारिभ्यः गृहीतवान्। सः अवदत् यत् दरभङ्गायां प्रचलन्त्यः एताः परियोजनाः जनपदस्य विकास-दृष्ट्या अतीव महत्त्वपूर्णाः सन्ति। एतासां सम्पूर्णतया गमनागमनं, परिवहनं, पर्यटनं, शिक्षा, शोधकार्यं चेति बहुषु क्षेत्रेषु सकारात्मक-परिवर्तनम् आगमिष्यति तथा च सामान्य-जनेभ्यः उत्तमाः सौविध्य-सुविधाः लप्स्यन्ते।सः सम्बन्धित-विभागेभ्यः परस्पर-समन्वयेन कार्येषु गतिवर्धनार्थं सततं पर्यवेक्षणं (Monitoring) निश्चितीकर्तुं च निर्देशं दत्तवान्। अपि च स्पष्टीकृतं यत् निर्माणकार्याणि गुणवत्ता-मानकैः सह किमपि सन्धानम् अकृत्वा समये एव समापनीयानि। जनपद-दण्डाधिकारी कौशल-कुमारः अपि सर्वान् अधिकारिणः अभियन्तॄंश्च सांसदस्य निर्देशान् पालयन्तः सर्वासु परियोजनासु गतिवर्धनार्थं, गुणवत्ता-संरक्षणार्थं निर्धारित-समये च कार्य-सम्पन्नाय निदेशितवान्। निरीक्षणकाले अधिकारिभिः विविधानां परियोजनानां प्राविधिक्याः भौतिक्याः च प्रगतेः विषये सांसदः अवगतः कृतः।

# भेल-दलः बिहारे विद्युद्वाहन-पूरणकेन्द्राणां कृते स्थल-सर्वेक्षणं करिष्यति; प्रथमे चरणे त्रयोविंशति-जनपदानाम् एकोनत्रिंशदधिक-शत-स्थानेषु स्थापयिष्यन्ते केन्द्राणि



हिमसंस्कृतवार्ता राघव नाथ झा। बिहारराज्ये विद्युद्वाहनानां पूरण-संरचनायाः विकासाय महत्त्वपूर्णं पदं प्रक्षिप्तम्। प्रधानमन्त्रि-ई-चालन-योजनायाः (PM E-DRIVE) अन्तर्गतं प्रथमे चरणे राज्यस्य त्रयोविंशति-जनपदेषु एकोनत्रिंशदधिक-शत-स्थानेषु सार्वजनिकाः विद्युद्वाहन-पूरणस्थानकाः स्थापयिष्यन्ते। अस्यार्थं 'भारत-भारि-विद्युद्यन्त्र-प्रतिष्ठानम्' (BHEL) इत्यस्य दलेन सोमवासरतः स्थल-सर्वेक्षणं प्रारब्धम्। अगस्तमासस्य सप्तदश-दिनाङ्कतः विंशति-दिनाङ्कं यावत् प्रचलति अस्मिन् सर्वेक्षणे पाटलिपुत्र-गया-वैशाली-पूर्णिया-नालन्दा-सारण-नगराणां द्विसप्तति-प्रस्तावित-स्थलानां निरीक्षणं भविष्यति। दलम् एतेषु स्थानेषु विद्युत्-संयोगस्य, भूमेः उपलब्धतायाः, मार्ग-सुलभतायाः तथा च अन्यासां प्राविधिक-सुविधानाम् आकलनं करिष्यति। सर्वेक्षण-विवरणस्य आधारेणैव पूरणकेन्द्राणां संस्थापन-प्रक्रिया अग्रेसरिष्यति। अस्मिन् सन्दर्भे विश्वेश्वरय्या-भवने परिवहन-सचिवस्य कार्यालये एका सभा आयोजिता। अस्यां सभायां परिवहन-सचिवः राज कुमारः, भारि-उद्योग-मन्त्रालयस्य निदेशकः अमरेन्द्र किशोर सिंहः, भेल-संस्थायाः महाप्रबन्धकः जे. के. पटनायकः तथा च तस्य दलं समुपस्थिताः आसन्।
परिवहन-सचिवेन राज कुमारेण उक्तं यत् राज्ये विद्युद्वाहनानां प्रोत्साहनार्थं सुदृढ-सञ्चालन-जालस्य निर्माणं सर्वकारस्य प्राथमिकता वर्तते। प्रमुख-राजमार्गेषु नगरेषु च पूरणकेन्द्राणां स्थापनेन वाहनचालकानां विश्वासः वर्धिष्यते तथा च विद्युद्वाहनानां प्रयोगस्य गतिः तीव्रा भविष्यति।
तेन सूचितं यत् सम्बन्धित-जनपदानां अधिकारिभ्यः भेल-दलस्य पूर्ण-सहयोगार्थं निर्देशाः दत्ताः, येन सर्वेक्षणं निर्धारित-समये सम्पन्नं भवेत्। भारोद्योग-मन्त्रालयस्य निदेशकः अमरेन्द्र किशोर सिंहः अकथयत् यत् बिहारे त्रयोविंशति-नगराणाम् एकोनत्रिंशदधिक-शत-स्थानेषु सार्वजनिक-पूरणकेन्द्राणां संस्थापनाय राज्यसर्वकारेण प्रस्तावः प्रेषितः आसीत्। परियोजनायाः क्रियान्वयन-संस्थारूपेण भेल-संस्था नियुक्ता अस्ति।
उल्लेखनीयं यत् प्रधानमन्त्रि-ई-चालन-योजना २०२४ तमस्य वर्षस्य आश्विनमासे नवशताधिक-दशसहस्र-कोटि-रूप्यकाणां व्यय-अनुमानेन सह अधिसूचिता आसीत्। अस्मिन् समग्रे देशे सार्वजनिक-विद्युद्वाहन-पूरणस्थानकानां विकासाय द्विसहस्र-कोटि-रूप्यकाणां प्रावधानं कृतम् अस्ति। २०७० तमं वर्षं यावत् 'शून्य-उत्सर्जनम्' (Net-Zero) इति राष्ट्रिय-लक्ष्यम् अनुसृत्य हरित-परिवहनस्य विकासः एव सर्वकारस्य मुख्यम् उद्देश्यं वर्तते।

# एम्स-पाटलिपुत्रेण कृतं प्रथमं जीवद्दातृ-यकृत्-प्रत्यारोपणम्; बिहारे अत्याधुनिक-चिकित्सायाः नूतनः आरम्भः

हिमसंस्कृतवार्ता राघव नाथ झा। अखिलभारतीय-आयुर्विज्ञान-संस्थानम् (एम्स) पाटलिपुत्रेण स्वस्य प्रथमं जीवद्दातृ-यकृत्-प्रत्यारोपणम् (Living Donor Liver Transplant) साफल्येन सम्पाद्य बिहारस्य स्वास्थ्यक्षेत्रे नूतनः इतिहासः रचितः। अनया संसिद्ध्या राज्ये अत्याधुनिक-यकृत्-प्रत्यारोपण-सेवानां शुभारम्भः सञ्जातः, येन गम्भीर-यकृत्-रोगैः पीडिताः रुग्णाः सम्प्रति चिकित्सार्थम् अन्यराज्याश्रिताः न्यूनाः भविष्यन्ति। एम्स-पाटलिपुत्रस्य कार्यपालक-निदेशकस्य प्राध्यापक-(ब्रिगेडियर)-डॉ. राजू-अग्रवालस्य नेतृत्वे शल्य-उदररोग-विभागेन इदं जटिलं शल्यकर्म साफल्येन सम्पन्नम्। इतः पूर्वं संस्थया बिहारस्य प्रथमं मृतदातृ-यकृत्-प्रत्यारोपणम् अपि कृतम् आसीत्।
इदं प्रत्यारोपणं पाटलिपुत्रस्य चतुःपञ्चाशद्वर्षीयायाः महिलायाः कृतम्, या 'स्वप्रतिरक्षित-यकृत्-शोथ' (Autoimmune Hepatitis) इति रोगेण ग्रस्ता आसीत्। रोगस्य चरमावस्थायां प्राप्ते सति यकृत्-प्रत्यारोपणम् एव तस्याः जीवनरक्षणाय एकमात्रः प्रभावकारी विकल्पः अवशिष्टः आसीत्। अस्मिन् समये तस्याः स्वजनेन स्वस्य स्वस्थ-यकृतः एकः भागः प्रदत्तः। सूक्ष्मेक्षिकया कृतेन चिकित्सकीय-परीक्षणेन मूल्याङ्कनेन च प्रत्यारोपणम् उभयोः कृते निरापदं ज्ञातम्। जीवद्दातृ-यकृत्-प्रत्यारोपणं चिकित्साविज्ञानस्य जटिलासु शल्यप्रक्रियासु अन्यतमं मन्यते। अस्यां प्रक्रियायां दातुः शरीरात् यकृतः भागं निष्कास्य युगपदेव रोगिणः शरीरे प्रत्यारोप्यते तथा च रक्तवाहिनीनां पित्तवाहिनीनां च सन्धानम् अत्यन्त-सावधानेन क्रियते। शल्यकर्मणः अनन्तरं दातुः रोगिणः च विशारदैः सततं पर्यवेक्षणं क्रियते। यकृतः पुनरुद्भवन-क्षमत्वात् कालेन उभयोः शरीरे यकृत् सामान्यम् आकारं कार्यक्षमतां च प्राप्नोति। अस्य यकृत्-प्रत्यारोपण-कार्यक्रमस्य नेतृत्वं शल्य-उदररोग-विभागाध्यक्षेण प्राध्यापकेन उत्पल-आनन्देन कृतम्। अस्यां मण्डल्यां डॉ. कुणाल-पारसः, डॉ. बसन्त-नारायण-सिंहः, डॉ. किसलय-कान्तः तथा च संज्ञाहरण-उदररोग-अन्तःक्षेप्यरश्मिविज्ञान-अतिगम्भीरसंरक्षण-सूक्ष्मजीवविज्ञान-शुश्रूषा-रक्तकोश-विभागानां विशारदाः सम्मिलिताः आसन्। अस्मिन् कार्ये 'यकृत्-पित्तविज्ञान-केन्द्रस्य' (CLBS) प्राध्यापकस्य सुभाष-गुप्तस्य तस्य दलस्य च अपि सहयोगः प्राप्तः। एम्स-पाटलिपुत्रेण आर्थिकदृष्ट्या विपन्नानां रुग्णानां कृते यकृत्-प्रत्यारोपणं सुलभं कर्तुम् अपि उपक्रमः कृतः। आरम्भे पञ्चभ्यः योगेभ्यः निर्धनता-रेखातः अधः स्थितेभ्यः (BPL) रुग्णेभ्यः 'एम्स-सहायता-कोषात्' आर्थिक-साहाय्यं दत्तम्, येन अस्य व्ययसाध्यस्य उपचारस्य आर्थिकभारः न्यूनः भविष्यति। एम्स-प्रशासनेन उक्तं यत् इयं सफलता केवलम् एकस्य शल्यकर्मणः सिद्धिः नास्ति, अपि तु बिहारे उन्नतानां मितव्ययीनां च यकृत्-प्रत्यारोपण-सेवानां दृढा आधारशिला वर्तते। अनेन राज्यस्य प्रतिवेशि-क्षेत्राणां च रुग्णाः स्वगृहसमीपे एव उच्चस्तरीयम् उपचारं प्राप्तुं शक्ष्यन्ति तथा च चिकित्सार्थम् अन्येषु राज्येषु गमनस्य आवश्यकता अपि न्यूनीभविष्यति।

# रैयाम-सकरी-शर्करा-यन्त्रागाराणां पुनरुद्धारेण मिथिलायां वर्धिष्यन्ते वृत्ति-अवसराः, कृषकाणाम् आयः भविष्यति द्विगुणितः मन्त्री




हिमसंस्कृतवार्ता राघव नाथ झा।


प्रायः त्रिदशक-कालात् पिहितानां रैयाम-सकरी-शर्करा-यन्त्रागाराणां (Sugar Mills) पुनरुद्धारस्य दिशि राज्यसर्वकारेण प्रमुखः सङ्केतः दत्तः। इक्षु-उद्योग-मन्त्री सञ्जयकुमारः सोमवासरे अकथयत् यत् द्वयोः यन्त्रागारयोः पुनः सञ्चालनेन मिथिला-क्षेत्रे इक्षु-कृषकाणां वृत्ति-आयौ वर्धिष्येते, बृहत्प्रमाणेन च वृत्ति-अवसराणां (रोजगार) निर्माणं भविष्यति। तेन सूचितं यत् प्रस्तावित-शर्करा-यन्त्रागार-परियोजनायाः आधारशिला २०२६ तमस्य वर्षस्य नवम्बरमासस्य विंशतितमे (२०) दिनाङ्के स्थापयिष्यते। दरभङ्गा-प्रेक्षागृहे इक्षु-उद्योग-विभागेन आयोजितायाः एकदिवसीय-इक्षुकृषक-सङ्गोष्ठी-प्रशिक्षण-कार्यशालायाः उद्घाटनं मन्त्रिणा दीप-प्रज्वालनेन कृतम्। कार्यक्रमे संसद्-सदस्यः (सांसदः) डॉ. गोपालजी ठाकुरः, विधानसभा-सदस्याः (विधायकाः) मुरारि-मोहन-झा, राजेश-कुमार-मण्डलः, सुजीत-कुमार-सिंहः, इक्षु-आयुक्तः अनिल-कुमार-झा, जनपद-दण्डाधिकारी (DM) कौशल-कुमारः, जनप्रतिनिधयः, वैज्ञानिकाः, विशाला संख्यायां कृषकाः च उपस्थिताः आसन्। मन्त्री सञ्जयकुमारः अवदत् यत् सर्वकारः इक्षु-उद्योगं वृत्ति-सर्जनस्य प्रमुखं माध्यमं कर्तुं प्रयत्नशीलः अस्ति। सः अधिकारिभ्यः निर्देशम् अयच्छत् यत् विभागीय-योजनानां लाभः योग्येभ्यः कृषकेभ्यः समये प्रापणीयः। कृषकान् प्रति सः इक्षु-कृषि-विस्तारार्थं, कृषि-यन्त्रेषु दीयमानस्य अनुदानस्य लाभ-स्वीकरणार्थं, विभागीय-जालपुटे (Portal) पञ्जीकरणार्थं च आह्वानम् अकरोत्। तेन प्रतिपादितं यत् एकस्मिन्नेव दिने प्रायः पञ्चविंशतिसहस्रं (२५,०००) कृषकाः जालपुटे पञ्जीकरणं कृतवन्तः।

सः अकथयत् यत् वैज्ञानिकाः ग्रामं ग्रामं गत्वा कृषकेभ्यः आधुनिक-प्राविधिक-इक्षुकृषेः प्रशिक्षणं दास्यन्ति। अपि च राज्ये इक्षु-अनुसन्धान-संस्थानस्य स्थापनाय अपि उपक्रमः क्रियते। सांसदः डॉ. गोपालजी ठाकुरः अवदत् यत् केन्द्र-राज्यसर्वकारौ मिथिला-क्षेत्रस्य औद्योगिक-विकासाय बद्धपरिकरौ स्तः। रैयाम-सकरी-यन्त्रागारयोः पुनः आरम्भेण कृषकाः स्व-उत्पादस्य कृते उत्तमं विपणिं (बाजार) प्राप्स्यन्ति तथा च प्रत्यक्ष-परोक्ष-रूपेण विपुलाः वृत्ति-अवसराः सृष्टाः भविष्यन्ति। सः कृषकेभ्यः अधुनातः एव इक्षु-उत्पादन-संवर्धनाय सज्जीभवितुम् आह्वानम् अकरोत्।

कार्यशालायां कृषकेभ्यः इक्षु-क्षेत्र-विस्तारस्य, यन्त्रीकरणस्य, रोपणी-बीज-संवर्धनस्य (Nursery and Seed Development), गुड-निर्माण-घटक-योजनायाः तथा च आधुनिकायाः कृषिपद्धतेः ज्ञानं प्रदत्तम्। विशारदैः उन्नतानां प्रजातीनां चयनस्य, एकल-ग्रन्थि-बीजस्य (Single bud seed), सन्तुलित-पोषक-प्रबन्धनस्य, उत्पादन-वृद्धेः वैज्ञानिक-विधीनां च विषये प्रशिक्षणं दत्तम्। इक्षु-आयुक्तः अनिल-कुमार-झा असूचयत् यत् कृषकेभ्यः निःशुल्कं गुणवत्तायुक्तम् इक्षु-बीजं प्रदास्यते। बीजस्य कर्तन-वहन-पूरण-अवरोहण-व्ययं (Loading & Unloading) समग्रम् अपि राज्यसर्वकारः एव वक्ष्यति।

जनपद-दण्डाधिकारी कौशल-कुमारः अकथयत् यत् रैयाम-सकरी-यन्त्रागारयोः पुनः प्रवर्तनेन जनपदस्य सहस्रशः कृषकाः साक्षात् लाभान्विताः भविष्यन्ति। तेन सूचितं यत् द्वयोः यन्त्रागार-क्षेत्रयोः सम्प्रति प्रायः षड्विंशतिसहस्रं (२६,०००) कृषकाणां पञ्जीकरणं सम्पन्नम्। अपि च सः कृषकान् इक्षोः मूल्य-संवर्धित-उत्पादानां निर्माणाय अपि प्रेरितवान्।

कार्यक्रमस्य अन्ते प्रगतिशील-कृषकेभ्यः प्रशस्ति-पत्राणि दत्त्वा सम्माननं कृतम्। विभागेन कृषकाः आधुनिक-वैज्ञानिक-कृषेः अङ्गीकरणाय तथा च सर्वकारस्य इक्षु-विकास-यन्त्रीकरण-योजनानाम् अधिकतमाधिक-लाभ-ग्रहणाय प्रेरिताः।






## गल्ल सुण मितरा....

सज्जण बसदे जेकर परदेस अंदर, सुखसांत
उना गी देंदयां लैंदयां रैहणा।
जिन्हां गलियां च सज्जण मित्तर बसदे,
उनां गलियां च आंदे जांदेयां रैहणा।।

दुखड़े दिले दे सुणाई ने हल्के हुंदे,मैहरमां
दिले दरियां ने सदा सुणांदेयां रैहणा।
कंडे गमां दे नी रैंहदे सदा चुभदे,
गमां बिच्च बी सदा मुस्कांदेयां रैहणा।।

हरेक काली रात बाद सुनहरी भ्याग
हुंदी,इक्क आस दा दीया जलांदेयां रैहणा।
भावना जा बग्गा हुंदा फ़र्ज मितरा,
फ़र्ज अपणा सदा निभांदेयां रैहणा।।

उसदे अग्गे नी कुसे दा बस चलदा,सीस
उसदे अग्गे सदा झुकांदेयां रैहणा।
कदी ना कदी लोकां गाणे तेरे बी गीत
दर्दा,उट्ठदे बौंदे गीत बणांदेयां रैहणा।।

**अशोक दर्द 22-3-2003**

# संस्कृतं मधुरं सदा- ६३ (नागपञ्चमीपर्वविशेषः)

अस्माकं सनातने हिन्दुसमाजे पशुः पूज्यते, वृक्षः पूज्यते, नदी पूज्यते इत्येवं चेतनाचेतन-वस्तुपदार्थादिकं प्रायः सर्वं पूज्यते इत्येकां "वसुधैव कुटुम्बकम्" इति अवधारणां दृढीकरोति। उत्सवप्रियता भारतीयजनजीवनस्य प्रमुखविशेषता। देशे समये समये नैकानां पर्वाणां भव्यं समायोजनं हि एतस्य प्रत्यक्षं प्रमाणम्। पूजापार्वणादि- विविधपर्वणः समाचरणं भारतीयानां महतः आस्थाभावस्य परिचायकम्।

पर्वसु अन्यतमं पर्व- 'नागपञ्चमीपर्व' इति। श्रावणमासस्य शुक्लपञ्चमीतिथिपर्व नागेभ्यः समर्पितमस्ति। तद्दिने व्रतपूर्वकं नागानां पूजनं क्रियते इतीयं सनातनी परम्परा। वेदपुराणादिषु नागानाम् उद्गमः महर्षिकश्यपतः एवं तत्पत्नी- कद्रूतः मन्यते। नागानां मूलस्थानत्वेन पाताललोकः सुप्रसिद्धः। पुराणानुसारं नागलोकस्य राजधानीत्वेन भोगवतीपुरी विख्याता। पुराणेषु यक्षः, किन्नरः, गन्धर्वः इत्यादीनां वर्णनेन सह नागानामपि वर्णनम् उपलभ्यते। भगवतः विष्णोः शय्यात्वेन नागराजः शोभते। भगवतः शिवस्य, गणेशस्य च आभूषणत्वेन नागानां महत्त्वपूर्णा भूमिका वर्तते। नागः भारतीयसंस्कृतौ देवत्वेन स्वीकृतः अस्ति। कश्मीरस्य सम्पूर्णभूमिः नागानाम् अवदानस्वरूपा कथ्यते। तत्रस्थस्य प्रसिद्धनगरस्य 'अनन्तनाग' इति नाम्ना नामकरणं नाम एतस्य ऐतिहासिकं प्रमाणम् आवहति। देशस्य पर्वतीयक्षेत्रेषु नागपूजा आधिक्येन प्रचलति, तत्र नागदेवः अत्यन्तं पूज्यः वर्तते। अस्मद्देशस्य प्रत्येकं ग्रामनगरादिक्षेत्रेषु नागदेवानां बहुधा पूजास्थलानि प्राप्यन्ते। ग्रामदेव-लोकदेवादिरूपेषु नागदेवः पूज्यते। भारतीयसंस्कृतौ सायं, प्रातःकाले भगवत्स्मरणेन सह अनन्तवासुक्यादिनाम्ना नागदेवः अपि स्मर्यते। तत्स्मरणेन विषभयाशुभादिकं दूरीभवेत्, विजयस्य च प्राप्तिर्जायते इति जनेषु विश्वासः। उक्तमस्ति-

**'अनन्तं वासुकिं शेषं पद्मनाभं च कम्बलम्।**
**शंखपालं धार्तराष्ट्रं तक्षकं कालियं तथा।।**
**एतानि नव नामानि नागानां च महात्मनाम्।**
**सायंकाले पठेन्नित्यं प्रातःकाले विशेषतः।।**
**तस्मै विषभयं नास्ति सर्वत्र विजयी भवेत्।।'**

इति।

अस्मद्ऋषिमुनिभिः नागोपासनासन्दर्भे अनेकविधं व्रतपूजनविधानं कृतमस्ति। श्रावणमासस्य शुक्लपञ्चमी नागेभ्यः आनन्दप्रदायिनी उच्यते- 'नागानामानन्दकरी' इति। अस्माकं धर्मग्रन्थेषु नागपूजायाः विधानं विहितमस्ति । व्रती विध्यनुसारं नागपूजनं विधाय तद्दिने एकवारं भोजनं कुर्यादिति। पूजायां भूमौ नागचित्रस्य अङ्कनं कर्तव्यम्। स्वर्णं, रजतं, काष्ठं, मृत्तिका इत्यादिभिः नागमूर्तिं निर्माय पुष्पाक्षतधूपदीपनैवेद्यादिभिः यथालब्धोपचारैः यथाविधि सश्रद्धं च पूजनं कर्तव्यम्, तदनन्तरं नमस्कारप्रार्थनादिकं विधेयम्-

**'सर्वे नागाः प्रीयन्तां मे ये केचित् पृथिवीतले।**
**ये च हेलिमरीचिस्था येऽन्तरे दिवि संस्थिता।।**
**ये नदीषु महानागा ये सरस्वतिगामिनः।**
**ये च वापीतडागेषु तेषु सर्वेषु वै नमः।।'**

इति भविष्यपुराणम्।

वस्तुतः अस्मत्संस्कृतिः मनुष्यः, पशुः, पक्षी, कीटः, पतङ्गः इत्यादिषु सर्वेषु एकमात्रस्य ईश्वरस्य दर्शनं कारयति इतीयम् एका महती परम्परा, विशेषता चेति, शुभम्।



हिमसंस्कृतवार्ता
असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः